अस्मत्पितृचरणास्तु — अवच्छेदकत्वं स्वरूपसम्बन्धो वान्यद् वा सर्वथा वच्छेद्यानतिरिक्तवृत्तित्वेन । न यथा दण्डत्वस्य दण्डजन्यतावच्छेदकत्वं मेयत्वस्य घटजन्यतावच्छेदकत्वं न च स्यादिति भूयानतिप्रसङ्ग आपद्येत । तथा च तदीयत्वं च शृङ्गाभावप्रतियोगितावच्छेदकं, तदवृत्तित्वात् । अत एव मणिकृताप्युक्तं 'प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक' इति । न च व्यधिकरणधर्मावच्छिन्नविषयताप्रतियोगितानन्त्यस्य प्रमाणत्वेनाभिधानादिदमसङ्गतमिति वाच्यम् । तत्रावच्छिन्नत्वस्य प्रकारैक्यार्थत्वात् । वस्तुतोऽतिरिक्तविषयता नास्त्येव । अनतिरिक्तायास्तु समानाधिकरणेदन्त्वाद्यवच्छेद्यत्वं न तु व्यधिकरणधर्म । न च प्रमुष्टत(त्वात्ता)स्थानस्मृतौ समानाधिकरणधर्मस्याप्रकारत्वात् किमवच्छेदकमिति वाच्यम् । तत्राप्रकारीभूतस्याप्यनतिप्रसक्तधर्मस्यावच्छेदकत्वादित्याहुः ।

तस्माद् व्यधिकरणधर्मावच्छिन्नाभाववन्निति यावेत्सम्भवतीति लक्षणान्तर मणिकृत ऊचुः । तथा हि — प्रतियोग्यसमानाधिकरणत्व समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यत्र भवति तेन सह तस्य सामानाधिकरण्य तदवच्छिन्नस्य सर्वस्यापि व्याप्तिरि'ति ।

अत्र वदन्ति — तत्तद्धूमसमानाधिकरणाशेषाभावप्रतियोगितावच्छेदकत्व वह्नित्वावच्छिन्नत्वाद् वह्नेर्नासिद्ध्यनुमानाद्यापि । न च यत्र भवती यस्य यदवच्छिन्न न भवती यर्थ, तथा च वह्नित्वावच्छिन्न प्रति तत्तद्वह्नि न नावच्छेदकमिति सा व्याप्तिरिति वाच्यम् । तत्तद्वह्निस्य वह्नित्वावच्छिन्नानतिप्रसक्तत्वेन तदवच्छिन्न प्रत्यप्यवच्छेदकत्वादिति ।

अत्र पक्षधरमिश्राः — ननु व्यत्यासेन प्रतियोगितानवच्छेदकावच्छिन्नत्वमर्थः । तथा च तत्तद्वह्निस्य प्रतियोगितावच्छेदकत्वेऽपि सा यतावच्छेदकवह्नित्वस्य प्रतियोगितावच्छेदकत्वात् नाव्याप्तिशङ्केत्याहुः ।

अत्र शङ्क्यते — एवं सति व्यभिचारिण्यतिव्याप्तिः । धूमत्वस्यापि तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । प्रतियोगितायाः तत्तत्स्वरूपरूपायाः धूमत्वानवच्छेद्यत्वात् । अतिरिक्तवृत्तेरनवच्छेदकत्वात् । न च तादृशात्यन्ताभावप्रतियोगितात्वावच्छिन्नप्रतियोगितावच्छेदकत्वं विवक्षितम् । नच धूमत्वे नास्त्येव । तादृशात्यन्ताभावप्रतियोगिवृत्तिधूमवृत्तितया धूमत्वस्य तादृशावच्छेदकत्वसत्त्वा

१ 'गत्ता' क पाठ

DR. RUPNATHJI( DR. RUPAK NATH )

दिति वाच्यम् । एवं सत्यपि व्याप्तेर्दुरुपरिहारत्वात् । धूमवन्निष्ठयावद्वह्निविशेषाभावप्रतियोगितावच्छेदकत्वाविरहितवह्नित्वस्यापि प्रतियोगितावच्छेदकप्रतियोग्यनवच्छेदकत्वादिति ।

अत्र नव्याः —एकवचनमभावविशेषणम् । तथा च हेतुसमानाधिकरणैकाभावप्रतियोगितानवच्छेदकत्वमर्थः । तथा धूमवन्न्याय नास्ति । वह्निसमानाधिकरणधूमसामान्याभावप्रतियोगितावच्छेदकत्वात । वह्नित्वे च नत्वम् । धूमवति वह्निसामान्याभावाभावेन तथाभूतैकाभावप्रतियोगितानवच्छेदकत्वात् तस्य । अत एव सामान्याभावसाधनमपि मणिकृता युज्यत इति साध्यामिनं व्याप्तिरिति वदन्ति ।

अत्र चिन्त्यम् —अयमन्यथाप्रकारासम्भवात्सर्वाक्षिति व्यभिचारिण्यतिव्याप्ति । अन्यथास्य यावदुक्तत्वपर्याप्तसंसर्गाभावस्यहत्वाभावेन हेतुसमानाधिकरणैकाभावप्रतियोगितानवच्छेदकत्वाद् अन्यथाभाववत्त्वम् । न चोद्भूतरूपनैजगत्यावच्छिन्नसामान्याभाव एवान्यथाभाव इति न तत्रातिव्याप्तिरिति वाच्यम् । कस्यचित् तत्र प्रागभावस्य कस्यचिद् ध्वंसस्य सत्त्वेनात्यन्ताभावासम्भवात् । अत्यन्ताभावस्य प्रतियोगिनेव प्रागभावादिनापि विरोधात् । ननु निरोध फलबलकल्प्य । स च घटज्ञाने तदधिकरणे तदत्यन्ताभावाग्रहात् तेन सहास्तु । न तु प्रागभावादिनापि, मानाभावात् । प्रत्युत ध्वंसप्रागभावकाले तदानीं कपालेषु घटो नास्तीति प्रतीत्या अविरोध एवेति चेद्, एवं सत्यपसिद्धान्तापातात् । अस्तु वान्यथाभावः सामान्याभावो । तथापि यत्र तावद् विशेषाभाव साध्य, तत्र व्यभिचारिण्यति व्याप्तिर्दुर्वारा । किं बहुना, यदा घटस्तदा घट इति कालिकव्याप्त्यातिव्याप्त लक्षणम् । घटत्वसमानकालीनैकध्वंसप्रतियोगितानवच्छेदकत्वाद् घटत्वस्य । ध्वंसस्य सामान्याभा(वा? वश्य)भावेन एकविशेषाभावस्यैव प्रतीने, तत्प्रतियोगितायाश्च स्वधर्मात्रवृत्तित्वेनातिरिक्तवृत्तिघटत्वानवच्छेद्यत्वादिति । तस्मादिदमत्राकूतम् —एकपदं हेत्वधिकरणविशेषणम् । तेनैकहेत्वधिकरणनिष्ठयावदभावप्रतियोगितात्वावच्छिन्नानवच्छेदकत्वमर्थः पर्यवस्यति । न च सद्धेतावव्याप्तिः । एकधूमाधिकरणमहानसवृत्त्यत्यन्ताभावसमूहप्रतियोगितानाश्रयमहानसीयवह्निवृत्तित्वेन वह्नित्वस्य तथाभूताभावप्रतियोगितानवच्छे

१ गवा' क पा २ व । घ' प पाठ

DR. RUPNATHJI( DR. RUPAK NATH )

चानङ्गीकारात् । भावप्रतियोगिकाभावप्रतियोगितायाश्चाभाववृत्तिधर्मानवच्छेद्यत्वात् । विरोधिपरत्वे च भावस्यैवाभावविरोधित्वात् प्रतियोगितावच्छेदकमभावत्वं भवत्येवेति नातिप्रसङ्गः ।

पक्षधरमिश्रास्तु — अत्यन्ताभावपदं भावसामानाधिकरण्यविरोधिसंसर्गाभावपरमवश्यं वाच्यम् । तेन दैशिकसामानाधिकरण्येऽत्यन्ताभावस्य, कालिकसामानाधिकरण्ये ध्वंसप्रागभावयोर्लाभः । अन्यथा यदा घटस्तदा घट इति कालिकव्यक्तिव्याप्यता जातौ प्रसज्ज्येत । महाप्रलये घटत्ववति घटध्वंससत्त्वेऽपि तदत्यन्ताभावाभावेन घटत्वस्य तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । न च महाप्रलये घटध्वंसवत् तदत्यन्ताभावोऽप्यस्त्येव, तत्प्रतियोगितावच्छेदकमेव घटत्वमिति नातिव्याप्तिरिति वाच्यम् । तथा सति गोत्वाश्वत्वयोरपि कालिकव्याप्तिर्न स्यात् । गोत्ववति कालेऽश्वात्यन्ताभावस्यापि सत्त्वादिति वदन्ति ।

अत्र शङ्क्यते — प्रलयेऽत्यन्ताभावसत्त्वेन तस्य चात्यन्ताभावस्य तत्कालोपाधौ ध्वनत्यसमानकालत्वेन प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वेन व्यक्तेर्जातिनिरूपितव्यापकताया अप्रसङ्गः, जातौ तु नैवम् । विद्यमानस्यापि जात्यत्यन्ताभावस्य सकलकालोपाधौ प्रतियोगिसमानकालतानियमाद् विशिष्टाभावप्रतियोगित्वस्य तत्रासत्त्वादव्याप्तिनिरासादिति ।

अत्रायमाशयः — पक्षधरमिश्राणां कालिकव्याप्तावन्वयव्यतिरेकाभ्यां ध्वंसप्रागभावगर्भव्यभिचारज्ञानस्य, दैशिकव्याप्तावत्यन्ताभावगर्भव्यभिचारज्ञानस्य(च) प्रतिबन्धकत्वाद् भावसामानाधिकरण्यविरोधिससर्गाभावपरत्वमावश्यकम् । तदुक्तं पक्षधरमिश्रैः — तत्र तदत्यन्ताभावसत्त्वेऽपि ध्वंसप्रतियोगित्वज्ञानस्य विरोधित्वादिति ।

अत्र कश्चित् — अत्यन्ताभावपदमावश्यकम्, अन्यथा संयोगवान् गुरुत्वादित्यत्र गुरुत्ववति काले यत्किञ्चित्संयोगावश्यंभावेन पूर्वसयोगध्वंससत्त्वेऽपि संयोगसामान्यस्य गुरुत्वव्यापकता कालिकी हीयेत । गुरुत्वसमानाधिकरणसकलसंयोगध्वंसस्य तत्तत्कालोत्पन्नस्यानतिप्रसक्ततया सयोगत्वस्य प्रतियोगितायामवच्छेदकत्वात् । अत्यन्तपददाने तु न दोषः । गुरुत्वकाले सयोगात्यन्ताभावसत्त्वेऽपि तस्य प्रतियोगिसमानकालत्वात् । प्र(त्य ! ति)योग्यसमानकालात्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य संयोगत्वे सत्त्वादिति । तदसत् । एकत्वस्याधि-

DR RUPNATHJI( DR RUPAK NATH )

दण्डत्वादेः कारणतावच्छेदकत्वेन । यदि च दण्डत्वैकान्यान्यत्व [illegible]त्वादिघटि-तमिति तदेव लाघवादवच्छेदकमङ्गीक्रियते, तदा प्रकृतेऽपि [illegible] दृष्टि । तस्मात् सिषाधयिषाविरहसहकृतसिद्ध्यभाव एव पक्षता, सिषाधयिषा चानुमितिगोचरेच्छामात्रं, सा च सिद्धित्वप्रकारानुमितित्वप्रकारिका [illegible] विशेषो नादरणीयः ।

नन्विदं लक्षणमनुपपन्नम् । सिसाधयिषा हि [illegible]तत्पक्षकतत्साध्यक-तत्पुरुषीयेच्छा पक्षताघटिका वाच्या, अन्यथाति[illegible] । तथा च यस्य घनगर्जितायनुमितौ नेच्छा, तस्य तत्सिसाधयि[illegible] पक्षताविरहाद् गर्जितेन घनानुमानं न स्यादिति चेद्, न । [illegible]मिद्धावीश्वरेच्छा स्वेच्छा च प्रयोजिका । तथा च फलीभूतसिद्धिप्रयोजकत[illegible]त् )साध्यकेच्छाविरहसमाना-धिकरणसिद्ध्यभावो यदात्मनि, तदात्मनि प[illegible]कारात् घनगर्जितादावपीश्वरे-च्छामादाय प्रसि(द्धि ? द्धे)रदुष्टत्वात् । न च सिद्धसाधनस्थलेऽप्यनुमिति स्याद्, ईश्वरेच्छाविरहविशिष्टसिद्ध्यभावस्य [illegible]स्थलेऽपि सत्त्वादिति वाच्यम् । ईश्वरे-च्छाविरहसमानाधिकरणसिद्धेरेव [illegible]नात्मनि सत्त्वेन तदभावाभावात् । [illegible] [illegible] [illegible] । अस्तु वा तत्सिद्धयनन्त[illegible]साध्यकसमानाधिकरण-[illegible] पक्षतापटिका, अतो न [illegible]ऽतिप्रसङ्गादापि । न चैवं यत्र क-दापि [illegible] नास्ति, तत्रासिद्धिरिति वाच्यम् । तत्र विशिष्टाभाव-रूपपक्षतायाः [illegible] । [illegible] [illegible] [illegible], [illegible] [illegible] । [illegible] [illegible] [illegible] कारण, [illegible] नियमहाथ । [illegible] [illegible] [illegible] [illegible] ।

नन्वेवं [illegible] विशिष्टाभाव [illegible] [illegible] न [illegible], सिद्धिसमये [illegible] । [illegible]-[illegible] । न च [illegible] विशिष्टाभाव । तथा सति सिद्ध-साधनस्थले [illegible] । [illegible] चेद्, न । यत्र सि-[illegible] [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] ।

१ [illegible]

करणधर्मावच्छिन्नाभावानङ्गीकारः । इह त्वारोप्यसम्बन्धस्य न ज्ञानमपेक्षितं, येन व्यधिकरणसम्बन्धावच्छिन्नाभावोऽपि न स्यात् । संसर्गश्च सर्वत्रप्रसिद्ध एवारोप्यत्वादिति वदन्ति ।

अत्र शङ्क्यते — आकाशसमवायस्याप्रसिद्धस्य कथमारोपः । भूतलादौ च घटादिसंयोगोऽत्र प्रसिद्ध एवारोप्यते । किञ्चाहार्योऽयमारोपः । स चाकरणसाध्यः । न चेच्छात्मकः तदज्ञाते सम्भवतीति न समवायसम्बन्धावच्छिन्नाकाशाद्यारोप इति ।

अत्र प्रतिभाति — घटसंयोगमात्रं नारोपविषयः, किन्तु भूतले घटसंयोगः । स च पूर्वाप्रसिद्ध एव । अप्रसिद्धावपि तस्यारोपे प्रमाणं वा क्वापि नापेक्ष्यम् । संसर्गप्रसिद्धेरनङ्गत्वात् । न च संसर्गप्रसिद्धेरनङ्गत्वेऽप्याकाशसमवायस्यालीकस्य कथमारोप इति वाच्यम् । आकाशस्यैव समवायलक्षणसम्बन्धेनारोप्यत्वात् । आकाशस्य समवायस्य च सत्त्वेनालीकत्वाभावात् । अत एव विकल्पतात्, संसर्गज्ञानस्येच्छायां तन्त्रत्वाभावात् । अन्यथा सुखप्रकारकज्ञानानन्तरं मम सुखमास्त्विति इच्छा न स्यात्, सुखसमवायस्य प्रसिद्धत्वादिति । वस्तुतोऽन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वम् । घटावच्छिन्नान्योन्याभावस्यैव घटावच्छिन्नान्योन्याभावाभावादिति न काप्यनुपपत्तिरिति तत्त्वम् ।

वयं तु — एकेन केनचित्सम्बन्धेन सर्ववृत्तित्वं केवलान्वयित्वम् । अस्ति च मेयत्वादेस्तथात्वं, स्वरूपसम्बन्धेन जगद्वृत्तित्वात् । घटादेस्तु न तथात्वं, क्वचित् संयोगेन क्वचित् समवायेन क्वचित् स्वरूपसम्बन्धेन वृत्तेः । न चैवं घटाभावस्यापि जगद्वृत्तित्वात् केवलान्वयित्वापात । कपालादावपि सम्बन्धान्तरेण तद्भावनियमादिति वाच्यम् । घटाभावत्वादिना केवलान्वयित्वस्येष्टत्वात् । संयोगावच्छिन्नघटाभावत्वादिना त्वतथात्वं, भूतलादाववृत्तेरिति ब्रूमः ।

ननु प्रमेयत्वं कथं केवलान्वयि, प्रमाविषयत्वरूपस्य तस्य प्रमातद्विषयत्वयोरननुगमेनाननुगतत्वादिति चेद्, न । प्रमात्वेनोपस्थिता प्रमाव्यक्तयस्तद्विषयत्वानुगमिका इति प्राञ्चः ।

तत्र शङ्क्यते — प्रमात्वमपि यथार्थत्वनाननुगतं कथं प्रमाव्यक्तयनुगमकं स्यात् । किञ्च, विशेष्यतावच्छेदकं यद्येकं तदा परं विशेषणानुगमेनानुगमस्वीकारः । अन्यथा देवदत्तयज्ञदत्तौ छत्रिणाविनत्यत्रापि छत्रि त्वेनोभयानुगमप्रसङ्गात् । तथा च विषयत्वानुगमः कथं प्रमात्वानुगतधर्मेण ।

इत्युदाहरणं व्याप्तिग्रहो(पायि / पयि)कः, न तु साक्षात् तत्प्रतिपादकमिति वृद्धाः । यावत्साधनाश्रयाश्रितसाध्यसामान्यं व्याप्तिः । सा चोदाहरणवाक्यात् साक्षादेवावगम्यत इति नव्याः । उदाहरणलक्षणं व्याप्यतावच्छेदकावच्छिन्नवद्धर्मितावच्छिन्नमुद्दिश्य व्यापकतावच्छेदकावच्छिन्नवत्त्वविधायकन्यायावयवत्वम् । उपनये व्याप्यवति व्यापकसम्बन्धस्याविधेयत्वात् तत्र पक्षधर्मतामात्रस्यैव विधेयत्वाद् व्याप्यत्वांशस्यानुवादत्वान्नातिव्याप्तिः । अत एव यो नीलधूमवान् स वह्निमानित्युदाहरणाभासेऽपि नातिव्याप्तिः । नीलधूमत्वस्य व्याप्यतानवच्छेदकतया तत्रोक्तलक्षणाभावात् । उदाहरणसमानाकारवाक्यं च न न्यायावयव इति न तत्रातिव्याप्तिरिति नव्यम् ।

अत्र प्राञ्चः — उदाहरणवाक्ये व्यभिचारशङ्कावारणाय यो य इति वीप्सा कार्या । सा च यत्र व्यभिचारशङ्का तत्रैव । अन्यत्र तु केवलान्वयवादौ व्यभिचारशङ्का नास्तीति न तत्र वीप्सेत्याहुः । तेषां चायमाशयः — यो य इति वीप्सितशब्दश्रवणानन्तरमनुगततया प्रतीतजिज्ञासाया व्याप्तिग्रहप्रयोजनकत्वेऽवसिते यो य इति प्रथमयत्पदोपस्थाप्यधूमाधिकरणाभिन्नं सर्वं धूमाधिकरणं द्वितीययत्पदेन विशिष्य सामान्यतो वोपस्थाप्यते । तथा च सर्वत्र साध्यसम्बन्धज्ञानाद् व्यभिचारशङ्का न भवतीति भवति मनसा व्याप्तिग्रह इति केवलान्वयिस्थले वीप्सा न क्रियते । (तत्) तु न सम्यक् । तथा सति तत्र सामानाधिकरण्यदर्शनमपि व्यर्थं स्यात् । केवलान्वयित्वेन ज्ञाते सामानाधिकरण्येऽप्यनिश्चितत्वे । तस्मात् तत्रापि वीप्सा कार्यैव वादिना । मन्दकृते यस्य निर्वाहयितुमुचितत्वात् । प्रथमं तथा केवलान्वयिसाध्यकहेतुकन्याये उदाहरणावयवप्रवृत्तिः । व्याप्तिग्रहस्य तत्राप्रतिबन्धकशङ्काविरहात् तद्बोधकावयवानां तदुक्तरीत्या वैयर्थ्यस्य दुरुद्धरत्वात् । अस्मत्कृतप्रयोगे सर्वसम्प्रदायसिद्धतया न व्याप्त्यादिप्रदर्शनमत्रोपयोगम् इति न तत् प्रतिबन्धकमिति दिक् ।

मा[illegible]स्तु — वीप्सायामपि व्यभिचारशङ्कानवस्थानाद् न सा कार्या । यदि वा कार्या, तदा यत्पदमात्र, न तु तत्पदेऽपि । नानायत्पदोपस्थाप्यस्यैकतत्पदेन परामर्शसम्भवात् । तथा च 'यद्यत् पापं प्रतिजहि जगन्नाथ' नम्रस्य तत्' इत्यादाविति वदन्ति । तेषामयमभिप्रायः — वीप्सायामपि सर्वाधिकरणोपस्थि(ते?ति)रनुवादेन व्याप्तितात्पर्यकत्वमुद्ग्राहम्, न साक्षात् । तथा च यद्योगमाथ-



DR.RUPNATHJI(DR.RUPAK NATH)

किञ्च, समानाकारता यावत्तद्विषयविषयत्वतया यत्किञ्चित्तद्विषयविषयकतया वा । नान्त्यः । अतिप्रसङ्गात् । नाद्यः । मानसपरामर्शविषयाबाधितत्वादेरुपनयजन्यपरामर्शाविषयत्वासम्भवापातादिति ।

अत्र प्रतिभाति — अबाधितत्वासत्प्रतिपक्षितत्वातिरिक्तांशे यावान् मानसपरामर्शस्य यथा विषयः, तावान् तज्जन्यपरामर्शस्य तथैव विषयः, तादृशान्वय उपनयः । निगमनजन्यज्ञाने च साध्याभावस्य परामर्शे व्याप्तिविशेषणतया विषयस्य स्वातन्त्र्येणापि भानाद् न तत्रातिव्याप्तिः । न च तत्पक्षादिलक्षणे तथाप्यतिव्याप्तिरिति वाच्यम् । अवयवपदेनैव तद्व्युदासात् । तस्यावयवानवयवत्वात् ।

अत्र च हेत्वनवयवेनैव पक्षधर्मता प्रतिपाद्यता, किं तत्प्रतिपादकोपनयेनेति देश्यमनदेयम् । हेत्ववयवस्य कारणमात्राकाङ्क्षापूरकतया पक्षधर्मताबोधकत्वाभावात् । आकाङ्क्षाक्रमेणैव तदर्थस्य प्रतिपादयितुमुचितत्वादिति दिक् ॥

इत्युपनयग्रन्थः ।

---

## अथ निगमनग्रन्थः ।

उपनयानन्तरं निगमनम् । तच्च न्यायावयवत्वे सति व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रयुक्तसाध्य(ज्ञानजनक?)वचनत्वम् । प्रतिज्ञावचनाद्धि नाकाङ्क्षणासत्त्वाद् सिद्धिर्न भवति । प्रतिज्ञाया च न व्याप्त्यादिधीप्रयुक्ततज्जनकत्वमिति न तत्रातिव्याप्तिः ।

ननु व्याप्तिविशिष्टपक्षधर्मतावाक्यान्तरेणैव प्रतिपादनाद् निगमनं किमर्थमिति चेद्, न । अबाधितत्वादि(ति?)बोधकत्वेनास्योपयोगात् । अबाधितत्वादिज्ञानस्यानुमितिहेतुत्वात् । यद् यदभावे सति न भवति, तत् तदभावावगमकमिति मणिकृतः । तेषामयमाशयः — अबाधितत्वादौ निगमनेन प्रतिपादिते सति न साध्याभावानुमितिप्रतिबन्धकीभूतज्ञानं सति व्याप्तिविशिष्टपक्षधर्मताज्ञाने बाधादिज्ञानाभावसहकृतमनुमितिं जनयतीति तदनुकूलत्वान्निगमनं (न) व्यर्थमिति । एतेनाबाधितत्वज्ञानस्यानुमितिहेतुत्वे तद्विषयकत्वमपि परामर्शे स्वीकार्यम् । तथा च परामर्शविषयीभूतत्वेनासिद्धिमन्यवद्रतो बाधादे

स्यादित्यपसिद्धान्त । किञ्चाबाधितत्वज्ञान सा यज्ञानमेव । तथा च साध्यज्ञान स्याज्ज्ञानहेतुरिति फलितमिति सिद्धम् । नानुमित्यनन्तरं पक्ष स्यादित्यानिर्दिष्टमपास्तम् । अबाधितत्वज्ञानहेतुत्वस्य मणिकारानभिप्रेतत्वेनोक्तदोषापरिहारात् । यथा चैव सति न निगमनानर्थक्य, तथा च व्युत्पादितमेव ।

केचित्तु — अनुमितावबाधितत्वप्रमाया गुणत्वेन हेतुत्वमिति सशयनिश्चयसाधारणमबाधित ज्ञानमनुमितित्वावच्छेदेन हेतुरेव । अत एव न सिद्धसाधनम् । यथा चेवमपि नासिद्धान्तत्वमेतत्पक्षे तस्य सर्वे यथानुपपत्तिः साधीयानित्याहु ।

ननु निगमनेन कथमबाधितत्वासत्प्रतिपक्षितत्वभानम् । सा सप्रतिपक्षतामात्रेण तथात्वे प्रतिज्ञाया अपि तथात्वापत्तिरिति चेद्, न । प्रतिज्ञावाक्येन साध्यस्य प्रतिपादनेऽपि साध्याभावानुपपत्त्यनुसन्धानानुपदर्शनाद् न तत्र साध्याभावव्युदासावगम । इह तु तस्मादित्यनेन व्याप्यधूमसद्भावप्रतिपादनेन वह्निव्याप्यदर्शनस्यैव जननाद् नात्र वह्न्यभावोऽस्तीति ज्ञायते । तच्च ज्ञानं मानसमनुमितिरूपं वेति न कश्चिद् विशेष । यद्वा, साध्ये पुनर्वचनस्यानुवादतया प्रयोजनजिज्ञासायां बाधाद्यभाव एव प्रयोजन पारिशेष्यादवसीयते । तथा चोक्तं — । नागादिविरहज्ञानं च पूर्वोक्तप्रकारेणेव । न साकाङ्क्षतानामभवात् । अवान्तरवाक्यार्थत्वात् । यद्यपि व्युत्पत्तिर्न्यायार्थज्ञान, तत् शब्दोपात विना वादिवाक्ये न निर्वहति । तथाप्यनादितात्पर्यं व्युत्पत्ति । सा चानादिलक्षणावाद् वादिवाक्येऽपि संभवत्येवेति न कोऽपि दोष इति ।

इदं तु बोध्यम् — न्यायवाक्ये नाय हेतुभाग तद्गुणयोगादिति कण्ठरोद्धारकोऽय, यथा नदीनद इत्यादिदृष्टान्तप्रयोगस्य सामयिक इति सङ्क्षेप ॥

इति निगमनम् ॥

—

अथ हेत्वाभाससामान्यनिरुक्तिः ।

अथ हेत्वाभासा । तत्र निर्णयनिरपेक्षोऽन्यः प्रतिरुद्धते । तत्रानुमिति-प्रतिबन्धकीभूतयथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति मणिकृत । नन्वि

DR.RUPNATHJI(DR.RUPAK NATH)

दप्रयुक्त, व्यभिचारादिज्ञानाभावदशायामनुमित्युत्पत्तेरव्याप्तेः करणविघटकहेत्वाभासस्यात्र व्याप्तेः । न चानुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वमेव लक्षणम्, स च व्यभिचारादावप्यस्तीति नाव्याप्तिरिति वाच्यम् । यथार्थपदेन व्यभिचारज्ञानविषयमद्धेतुत्वतिव्याप्तिनिरासेऽपि पर्वतधूमौ वह्निव्यभिचारिणाविल्येकादृश(?)विषयतामादाय सद्धेतुधूमादि याति अपि दुर्वारत्वात् । न च वह्निविषयतया यज्जन्यानुमितिप्रतिबन्धकं तद्विषये यथार्थत्वं ज्ञानस्य विवक्षितमिति वाच्यम् । बाधितलिङ्गासद्धेतौ । तत्र पक्षनिष्ठता वाभावविषयकतया तन्निष्ठस्य प्रतिबन्धकतया लिङ्गविषयकता प्रतिबन्धकत्वाभावात् । किञ्च, सत्प्रतिपक्षेऽव्याप्तिः । प्रतिबन्धकीभूतविरोधिव्याप्त्यादिज्ञानस्यायथार्थत्वादिति ।

अत्र केचित् — साध्याभावपक्षधर्मो हेतुरेकान्तिको वेति न्यायाद् व्यभिचारित्वानुपातेन तस्य सङ्ग्रह इति । व्याप्ति । सत्प्रतिपक्षेऽप्यसिद्ध्यादिसङ्कीर्णत्वात्तदिना सङ्ग्रह । सद्धेतुस्थलेऽपि व्याप्यत्वादिधीरेव दशाविशेषे विरोधिनीति तत्रातिव्याप्तिः स्यात् । एवमन्यत्रापीति । तच्चिन्त्यम् । यदि व्याप्तित्वेन सामान्यलक्षणेन न सङ्ग्रहः, तदा विशेषलक्षणेनापि तेन रूपेण सङ्ग्रहो न स्यात् । सामान्यलक्षणोपगृहीतस्यैव विशेषलक्षणेन परिग्रहात् । किञ्च, अग्रे वक्ष्यमाणलक्षणेनोदाहरणस्थलेऽव्याप्तिः सुदृढैव । तत्र व्यभिचारित्वाभावात् तथा सङ्ग्रहाभावात् । एवं सद्धेतु-सत्प्रतिपक्षादौ स्वीयव्याप्तिधीरेव विरोधिनीत्यपि । तन्न । धीयव्याप्त्यादिज्ञानस्य स्वसाध्यानुमित्युक्तत्वतया तद्विरोधित्ववचनात् । न च विरोधि व्याप्त्यादिधीविषयतावच्छिन्नस्वीयव्याप्त्यादिज्ञानमेवास्तु प्रतिबन्धकमिति वाच्यम् । तथा सत्प्रतिपक्षतया विरोधिव्याप्त्यादिधियः प्रतिबन्धकत्वाविरोधात् । यथा सामान्यधर्मावच्छिन्नव्यक्तेरपि ज्ञात्वात्मत्वप्रत्यक्षात्मकत्वाभावादिप्रसङ्गः ।

मिश्रास्तु — ज्ञानेऽनुमितिप्रतिबन्धकतावच्छेदको धर्मः इह यद्विशिष्टे ज्ञाने ऽनुमितिप्रतिबन्धकता तदाश्रयः स हेत्वाभास इत्युक्तम् । स च प्रतिबन्धकज्ञानविषयस्तद्विषयश्च । तथा च व्यभिचारादि । अत्र सत्प्रतिपक्षादौ विरोधिसामग्रीकालीनत्वादि । पक्षधर्मतादिप्रतिबन्धकतावच्छेदकत्वं गुरुत्वेऽपि तत्राविरोधात् । तथा चानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वं गोचरत्वाभावे निविषयत्वस्य लक्षणार्थत्वे सत्प्रतिपक्षादावपि तस्यात्र तत्राव्याप्ति । अत एव नोपाधावतिव्याप्तिः । उपाधि-

DR. RUPNATHJI( DR. RUPAK NATH )

भिचारेणायत्न(तान्तया) वेति न कश्चिद् विशेषः । यच्च — विषयनिष्ठप्रतिबन्धकतावच्छेदकस्य केनचित् सह ज्ञान विरोधिव्याप्त्यादेर्यदि सम्बन्धः, तदा साधारणेऽपि सत्प्रतिपक्षतापत्तिः, ज्ञानस्य तदाश्रितत्वादिति दूषणमुक्तम् । तदपि न । ज्ञानस्य हि व्यवहारबलादगत्या तत्सम्बन्धत्वाभ्युपगमेन साधारणदशायां तत्सम्बन्धरूपताविरहात् । घटसत्त्वदशायां भूतलस्य घटाभावसम्बन्धत्वानभ्युपगमवदत्रापि कदाचित् सम्बन्धत्वे दोषाभावादिति । यदपि — एवं सा कदाचिदाश्रयाश्रयिभावेन क्वचिच्च विषयविषयिभावेनाननुगम इति दूषणमभ्यधायि । तदपि न । यादृशसम्बन्धेन तद्वत्तामादाय व्यभिचारितामिद सत्प्रतिपक्षितमिदमिति धीः, तादृशसम्बन्धस्य लक्षणप्रवेशात् । स च क्वचिदाश्रयाश्रयिभावः, क्वचिद् विषयविषयिभाव इति । यत्तु न्यायरत्ने — सर्वत्रानुमितिप्रतिबन्धकतावच्छेदकधर्मनिरूपितस्वरूपसम्बन्धविशेष एव तद्वत्तानियामकः । स च तादृशसम्बन्धत्वेनानुगत इति ना(न)नुगमः । अत एव तत्र निरन्तरपरामर्शद्वयस्थले सत्प्रतिपक्षे तत्र विषयविषयिभावेऽपि विरोधिविशिष्टत्वं तज्ज्ञानमात्रवृत्तिरिति दिक् ।

इदं तु शङ्क्यते — लक्षणमिदं व्यभिचारादौ धर्मेऽस्ति यत्र, धर्मिण एवात्र व्यभिचाराद्याश्रयत्वात् । न च हेत्वाभिमतत्वे सतीत्यपि लक्षणविशेषणं देयमिति वाच्यम् । कदाचित् कस्यचिद् व्यभिचारादिधर्मस्यापि हेत्वभिमतत्वात् । सर्वदा सर्वधर्मिणोऽपि हेतुत्वेनानभिमतत्वात् । किञ्च, ज्ञानविषयत्वं विशेषणमुपलक्षणं वा । नाद्यः । तादृशज्ञानानन्तरं निवृत्तदोषस्य साधारणादेर्हेत्वाभासत्वप्रसङ्गात् । नान्त्यः । असाधारणसत्प्रतिपक्षादेर्नित्यदोषस्यापि विशेषदर्शनदशायामपि हेत्वाभासत्वापत्तेः । किञ्च, यद्युपस्थितदशाज्ञानविषयत्वं यस्य तस्य तत्प्रयुक्तं हेत्वाभासत्वम्, अन्यस्यापि वा । नाद्यः । विरुद्धादेरनन्तरदोषस्य तत्प्रमाहिपुरुषं प्रत्यनाभासतापत्तेः । नान्त्यः । व्यभिचारादिविशेषादर्शनात् तथा ज्ञायमानस्य विशेषदर्शिनं प्रत्यपि दोषतापत्तेः ।

अत्राहुः — अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वमात्रस्य यथार्थधीविषयत्वं विवक्षितम् । व्यभिचारादयस्तु धर्मास्तादृशधीविशेषणभूता इति नातिव्याप्तिः । तादृशधीविषयत्वं च विशेषणमेव । तच्च ईश्वरज्ञानविशेष्यत्वमादाय विरुद्धादिनित्यदोषे सर्वदास्तीति नाव्याप्तिः । सत्प्रतिपक्षादौ चानित्यदोषे चानिर्णयदशायां धीविरहकल्पनात् । फलैकोन्नेयत्वात् तस्याः । पुरुषान्तरीयतादृशधियमा

DR. RUPNATH(JI)(DR. RUPAK NATH)

यपरामर्शोत्पत्तिकाले प्रथमेनानुमितिरेव न कुत इति वाच्यम्। मिथ्यन्तरं प्रथमपरामर्शोत्पादात् सिद्धिप्रतिबन्धेनाव्यवधानेनानुमित्यजननात्। द्वितीयपरामर्शे(नं) प्रतिबन्धे(न?) निरुद्धद्रव्यत्वेन प्रथमेनानुमित्यजननात्। यद्वा द्वितीयपरामर्शोत्पत्तिकाले कार्यत सहभूतस्य तदभावव्याप्यभावेनानुमित्यनुत्पत्तिः। अन्यथा विशेषदर्शनकाले संशयापत्तेरिति मणेरप्यत्र स्वरसात्।

नन्वसम्भवग्रस्तमिदम्, एकत्र परस्परविरोधिभावतदभावयोरिव तद्व्याप्ययोरपि ज्ञानासम्भवादिति चेद्, न। उभयव्याप्यज्ञानानन्तर साध्ययोर्यत्र विरोधस्फूर्तिः, तत्रानुपपत्त्यभावात्। न चैवं विरो(धि)स्फूर्तिकाले एवानुमित्यापातः, परामर्शस्य वृत्तित्वादिति(?) वाच्यम्। विरोधज्ञानस्य प्रतिबन्धकत्वादिति वहन्त। तच्चिन्त्यम्। तथा सति विरोधधिय एव प्रतिबन्धकत्वं, न तु परामर्शात्मक सत्प्रतिपक्षस्य। मानाभावात्। तस्मात् साध्ययोर्विरोधावधारणेऽपि हेत्वोर्विरोधानवधारणे एकत्रोभयोपनयः सम्भवत्येवेति ध्येयम्। उत्तरकाले चानयोर्विरोधिव्याप्यतायामेकाधिकरण्यानुपपत्ति। तदनुपपत्त्या च विरोधिव्याप्यतानुपपत्तिरिति व्याप्ति पक्षधर्मतान्यतरभङ्गः कल्प्यते। न चैवमिदं दूषणमस्तु। व्याप्यभावज्ञानस्य करणविघटकतयास्य च परामर्शोत्पत्तिनिवर्तितया प्रतिबन्धकत्वायोगाद् आश्रयाभावव्याप्यज्ञानस्याप्यन्यत्र प्रतिबन्धकतया कल्पनात् प्रतिबन्धकत्वाभावस्य वक्तुमशक्यत्वाच्च। तस्मात् सत्प्रतिपक्षे परस्परव्याप्यज्ञान परस्परनिर्णयाय यत्र वृत्त, (तत्र) परस्परविरोधिव्याप्यज्ञानप्रतिबन्धाधीनमपि ज्ञानं जनयितुमीष्ट इति सिद्धान्तः।

अत्र र(त्नको)षकृत — विरोधिनिर्णयद्वयसामग्र्या संशयजनकत्वकल्पनात् परस्परगोचरा संशयरूपानुमितिरिहाप्युत्पद्यताम्। सत्प्रतिपक्षस्थलेऽप्ययमेव, यत् परस्परप्रतिबन्धाद् व्याप्ययुगपज्ज्ञानं निर्णयाजनकमिति वदन्ति।

अत्र मणिकृत — साध्यतदभावयोः परोक्षज्ञानाद् यथैकज्ञानं परज्ञानविरोधि, तथा तद्व्याप्ययोरपि साध्यादिविरोधितया तज्ज्ञाने सति संशयरूपमपि साध्यज्ञानमसम्भवि। प्रतिबन्धकत्वे क्रायासादस्य वक्तुमशक्यत्वादित्याहुः।

अत्र वदन्ति — यथा आश्रयाभावव्याप्यबुद्धेः अनुमितौ प्रतिबन्धकता, तथा विरुद्धनिर्णयसामग्र्या संशयजनकतापि कल्प्यतेति संशयरूपानुमितिरत्र जनिका। न च विशेषदर्शनसमवहिता निर्णयसामग्री संशयजनिका, इह तु विशेषदर्शनसमवधानात् कथं संशयं जनयत्विति वाच्यम्। अन्यतरकोटिविशेषदर्श-

DR. RUPAK NATH

तच्चोभयव्याप्यदर्शनकाले नास्तीति कथं न संशयरूपानुमितिः । यदपि च —निश्चयद्वयसामग्रीतः संशय इति सत्यम् । किन्तु यादृशो निश्चयस्य सामग्री, तादृशसंशयं प्रसूते । विशेषदर्शनं चावधारणात्मकनिश्चयसामग्रीत्यवधारणद्वयरूपसंशयः स्यात् । कोटिस्मृत्यादीन्द्रियसन्निकर्षादिकं तु प्रत्यक्षमात्रे सामग्रीति तैः प्रत्यक्षमात्रं जन्यते । तच्च संशयसामग्र्यभावे निश्चयरूपमेव । तत्सत्त्वे च संशयरूपमेवेति तत्र नायं दोषः । न चोभयव्याप्यदर्शनस्थले तत्राप्यवधारणरूपसंशयापत्तिरिति वाच्यम् । तत्रोभयव्याप्यदर्शनस्य परस्परप्रतिबन्धेन मूकत्वात् सामान्यसामग्र्या च संशयोत्पादादिति । तदप्यालोचनीयम् । अवधारणज्ञानत्वं न विशेषदर्शनजन्यतावच्छेदकं, व्यर्थत्वात् । अनुमितौ च तदुपस्थापकाभावादुपनीतभानस्य तत्रानङ्गीकारात् । भवतु वा विशेषदर्शनबलादेवानुमितौ व्यवच्छेदभानम् । तत् संशयरूपानुमितावप्यस्तु । विरुद्धयोः साध्यतदभावयोरिव व्यवच्छेद(क?)स्यापि भाने दोषाभावात् । अनुभूयते च किमयं स्थाणुरेव, किं पुरुष एवेति । (तस्माद्) नायं युक्तिसहः पन्थाः । यत्तु —संश(यांशे) कोट्योर्विरो(धो)ऽपि भासते । अनुमितौ व्याप्तिपक्षधर्मतानुपनीततया न तद्भानमिति कथं संशयरूपानुमितिरिति । तदपि न । संशयसामग्र्या एव विरोधभानम् । तत्र (तया?) तदुभयव्याप्यदर्शनस्य तद्भानसामग्रीत्वात् । वस्तुतो विरुद्धत्वेन ज्ञातयोः संशयकोटिता । विरोधभानं तु संशये सामग्रीसत्त्वासत्त्वाभ्यामनियतमित्येव तत्त्वम् । यच्च कैश्चिदुक्तम् —अनुमानानुसारेण न तावत् संशयरूपानुमितिः सत्प्रतिपक्षस्थले । अनुमिनोमीत्यनुव्यवसायाभावात् । अत एव न विरुद्धानुभवसामग्रीत्वेन संशयजनकताकल्पनम् । तथा सति तत्रानुमिनोमीत्यनुव्यवसायापातात् । तस्मात् फलबलाद् विरुद्धसत्प्रतिपक्षसामग्रीत्वेन संशयजनकतेति न संशयरूपानुमितिरिति । तदप्यसारम् । एवं सति संशयस्थले साक्षात्करोमीत्यनुव्यवसायाभावात् तत्रापि साक्षात्त्वजातिर्न स्यात् । यदि च सामग्रीबलात् साक्षात्त्वसिद्धौ व्यञ्जकाभावात् तदनभिव्यक्तिः, तदा प्रकृतेऽपि सामर्थ्यमनुसार्य दीयतां दृष्टिः । तस्मात् संशयरूपानुमित्यनङ्गीकारो निष्प्रमाणक इति ।

अत्र ब्रूमः —निश्चयसामग्री संशयजनिकेत्ययुक्तम् । अन्यसामग्र्या अन्यत्राजनकत्वात् । न चैवं संशयः क्वापि न स्यादेवेति वाच्यम् । घटतदभावज्ञानसामग्र्या विशेषणज्ञानादिरूपायाः सत्त्वेन तदुत्पत्तौ बाधकाभावात् । घटवि-

DR.RUPNATHJI(DR RUPAKNATH)

